# Shri Chidambarapanchakshara Stava

# श्री चिदम्बरपञ्चाक्षरस्तवः

## Document Information

Text title : Shri Chidambarapanchakshara Stava

File name : chidambarapanchAkSharastavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# श्री चिदम्बरपञ्चाक्षरस्तवः

श्रीगणेशाय नमः ।
श्रीचित्सभेशाय नमः ।
ॐ ह्रीं श्रीं नमः शिवाय ।
श्रीस्कन्दः
ओङ्कारार्णवभासमानवपुषं ओङ्कारवाच्यं विभुं
ओतप्रोतजगच्चराचरतनुं ओजस्विदूरङ्गमम् ।
ओड्याणाभिधपीठिकान्तरलसद्देवीसनाथं शिवं
ओजोनायकमण्डलस्थमुडुराड्चूडं नटेशं भजे ॥ १॥

ह्रीम्मूर्त्या शिवया विराण्मयमहीहृत्पङ्कजस्थं सदा
ह्रीणानां शिवकीर्तने हितकरं हेलाहृदां मानिनाम् ।
ह्रीबेरादिसुगन्धवस्तुरुचिरं हेमाद्रिबाणासनं
ह्रीङ्काराङ्कितपादपीठमतुलं हृद्यं नटेशं भजे ॥ २॥

श्रीमद्ज्ञानसभान्तरे प्रविलसच्छ्रीपञ्चवर्णाकृतिं
श्रीवाणीविनुताङ्घ्रिपङ्कजयुगं श्रीवल्लभेनार्चितम् ।
श्रीविद्यामनुमोदितं श्रितजनश्रीदायकं श्रीधरं
श्रीचक्रान्तरवासिनं शिवमहं श्रीमन्नटेशं भजे ॥ ३॥

नव्याम्भोजमुखं नमज्जलनिधिं नारायणेनार्चितं
नाकौकोनगरीनदीविलसितं नागाजिनालङ्कृतम् ।
नानारूपकनर्तनादिचतुरं नालीकजान्वेषितं
नादात्मानमहं नगेन्द्रतनयानाथं नटेशं भजे ॥ ४॥

मध्यस्थं मधुवैरिमार्गितपदं मद्वंशनाथं प्रभुं
माराराातिमतीव मञ्जुवपुषं मन्दारगौरप्रभम् ।
मायातीतमशेषमङ्गलनिधिं मद्भावनाभावितं
मध्ये व्योमसभं लसन्तमखिलं मान्यं नटेशं भजे ॥ ५॥

शिष्टैःपूजितपादुकं शिवकरं शीतांशुरेखाधरं
शिल्पं भक्तजनावने शिथिलिताघौघं शिवायाःप्रियम् ।
शिक्षाकारणमम्बुजासनशिरोभूषं सुशीलं प्रभुं
शीतापाङ्गविलोकनं शिवकरं श्रीमन्नटेशं भजे ॥ ६॥

वाणीवल्लभवन्द्यवैभवयुतं वन्दारुचिन्तामणिं
वाताशाधिपभूषणं वरकृपावारान्निधिं योगिनाम् ।
वाञ्छापूर्तिकरं वलारिविनुतं वाहीकृताम्नायकं
वामाङ्गाप्तवराङ्गनं वरकृपावासं नटेशं भजे ॥ ७॥

यक्षाधीशसखं यमप्रमथनं यामिन्यधीशाननं
यज्ञध्वंसकरं यतीन्द्रविनुतं यज्ञक्रियाधीश्वरम् ।
याज्यं याजकरूपिणं यमधनैर्यत्नोपलभ्याङ्घ्रिकं
यानीभूतवृषं यदूद्भवनुतं देवं नटेशं भजे ॥ ८॥

श्रीमायाविलसच्चिदम्बरमहापञ्चाक्षरैरङ्कितान्
श्लोकान् येऽनुदिनं पठन्ति नितरां चिन्तामणीनामकान् ।
तेषां भाग्यविशेषमायुरधिकं विद्या वरान् सत्सुतान्
सर्वाभीष्टमसौ ददाति सहसा श्रीचित्सभाधीश्वरः ॥ ९॥

इति शिवरहस्यान्तर्गतः श्रीचिदम्बरपञ्चाक्षरस्तवः सम्पूर्णः ।

Proofread by Aruna Narayanan

*Shri Chidambarapanchakshara Stava*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*